# संस्कृतम्

( अनिवार्यम् ) 2018

समयः होरात्रयम् | पूर्णाङ्काः 300

प्रश्नपत्रविषये विशेषनिर्देशाः

प्रश्नानां समाधानात् प्राक् सर्वेऽपि अधोलिखिताः निर्देशाः सावधानतया पठनीयाः

सर्वेऽपि प्रश्नाः समाधेयाः।

प्रत्येकं प्रश्नस्य/प्रश्नभागस्य अङ्काः तत्पुरत एव निर्दिष्टाः।

यदि अन्यथा निर्देशो न भवेत् तर्हि प्रश्नानाम् उत्तराणि संस्कृतभाषया एव देवनागरीलिपिनिबद्धया लेखनीयानि।

यत्रापि शब्दसीमा निर्धारिता तत्र सा अनुपालनीया एव। उत्तराणि चेत् सीमातः अधिकमात्रया विस्तीर्णानि लघुतराणि वा भवेयुः तदा अङ्कहानिः भविष्यति।

प्रश्नपत्रसहितोत्तरपुस्तिकायाः किमपि पृष्ठं पृष्ठांशो वा यदि रिक्तः त्यज्यते सः अवश्यं स्पष्टतया रेखाचिह्नेन निरसनीयः।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। नचेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् भवेत्।

# SANSKRIT

**( Compulsory )**

Time Allowed : Three Hours | Maximum Marks : 300

## QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions**

All questions are to be attempted.

The number of marks carried by a question/part is indicated against it.

Answer must be written in SANSKRIT (Devanagari script) unless otherwise directed in the question.

Word limit in questions, wherever specified, should be adhered to and if answered in much longer or shorter than the prescribed length, marks may be deducted.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.



RaadheytheVisiion || Contact us: - +919625757536; +918889907405
mailto:mentorship@raadheythevisiion.in raadheythevisiion.in
Mukherjee Nagar, North West, Delhi-110009

1. अधोलिखितेषु विषयेषु कमपि एकं विषयमधिकृत्य षट्शत-शब्दैः (600 परिमितशब्दैः) निबन्धो लेखनीयः — 100

*(a)* लोकतन्त्रे न्यायपालिकायाः भूमिका

*(b)* पर्यावरणम् आत्मनिर्भरता च

*(c)* भूमण्डलीकरणे भाषायाः भूमिका

*(d)* भारतीय-अर्थव्यवस्था तस्याः समालोचनानि च

2. अधोलिखितं गद्यांशं सावधानं पठित्वा तदनुसारं तदधस्ताद् प्रदत्तानां प्रश्नानामुत्तराणि स्पष्टतया संक्षेपतश्च स्वगिरा साधु दीयताम्— 12×5=60

गान्धीमहाभागं प्रति विश्वस्य अवधानम् एतदर्थम् आकृष्टं यतः तेन पशुबलम् अनादृत्य आत्मबलस्य शस्त्रम् उद्घाटितम्; शतघ्नीनां भुशुण्डीनां च प्रतीकाराय तेन अहिंसायाः आश्रयः कृतः। विचारणीयं तु इदं वर्तते यत् किमर्थं सः अहिंसाम् आश्रितवान्? किम् आङ्ग्लानां समक्षं हिंसायाः आश्रयेण भारतस्य स्वातन्त्र्यप्राप्तिः न संभाव्यते इति कारणम् आसीदत्र? अथवा एतदर्थं यदसौ मानवसमाजं इदं शिक्षितुम् ऐच्छत् यत् यावत्पर्यन्तं मानवः पाशविकानां साधनानां प्रयोगार्थं विवशः अस्ति तावदसौ सर्वथा पूर्णमानवस्य पदवीं नार्हति। प्रथमे विकल्पे तु इदमेव सिध्यति यदहिंसा अशक्तानां निरुपायानां च जनानां शस्त्रमस्ति। यदा अस्माकमधिकारे भुशुण्डीकाः न सन्ति तदा सत्याग्रहेणैव कार्यं कुर्मः इति निष्कर्षः अस्मिन्विकल्पे फलितो भवति। परम् अपरस्मिन् विकल्पे अहिंसा मानव-विकासस्य साधनमेव जायते। इयं मनुष्यस्य रूपं निर्मलीकरोति।

सत्यमिदं यद् गान्धीमहाभागस्य नेतृत्वे यदा भारतवासिनः ब्रिटेनराष्ट्रेण सह संघर्षरताः आसन् तदा बहुसंख्यकानां तु अयमेव भाव आसीत् यदहिंसा स्वातन्त्र्यप्राप्तेः साधनमात्रम् अस्ति। यतः हिंसकसाधनेभ्यो वयं आङ्ग्लैः सह योद्धुं न समर्थाः अतएव अहिंसैव अस्माभिः अवलम्ब्यते। किन्तु गान्धीमहोदयानां दृष्टिस्तु एतादृशी नासीत्। अहिंसां परित्यज्य सः भारतस्य स्वाधीनतां प्राप्तुं नैच्छत्। भारतस्य स्वातन्त्र्यं तस्य कृते महद् लक्ष्यम् आसीत् किन्तु ततोऽपि अधिकतरं लक्ष्यं तु मानवीय-स्वभावस्य परिवर्तनम् आसीत् मनुष्ये च अस्य विश्वासस्य आधानम् आसीत् यत् सः पाशविक-साधनानाम् अवलम्बेन विनापि मानवीयमूल्यानामनुसरणेनैव निर्धारितानां लक्ष्याणां प्राप्तौ समर्थः अस्ति।

न केवलं स्वकीयानां देशवासिनां कष्टानां निवृत्तिः गान्धीमहाभागस्य मुख्यमुद्देश्यम् आसीत्; अपितु मानवस्य पाशवीकरणस्य निरोधः तस्य मुख्यम् उद्देश्यम् आसीत्। क्रोधः घृणा अविवेकश्च इत्येते तु पशुषु एव भवन्ति। तेऽपि एभिः शस्त्रैः प्रतिपक्षिणां प्रतीकारं कुर्वन्ति। परं मानवस्तु तेभ्यो भिन्नः अस्ति। तस्मात् आवेगानां निग्रहं कृत्वा त एव उपायाः तेन दैनन्दिन-जीवनस्य समस्यानां समाधाने प्रयोक्तव्याः ये पशुषु दुर्लभाः सन्ति किन्तु मानवेषु सुलभाः भवन्ति। कथं गान्धीमहोदयः एवं निर्णीतवान्? कथम् अहिंसायाः अयं प्रयोगः भारते एव आरब्धः न तु अन्येषु देशेषु? अनेके जनाः इमं प्रश्नं दैवयोगमेव मत्वा समाधास्यन्ति। किन्तु नायं दैवयोगः आसीत्। अमेरिकादेशस्य चिन्तकेन 'थोरो'-महाभागेनापि सत्याग्रहस्य, सविनयस्य आज्ञाभङ्गस्य च कल्पना कृता आसीत् इति श्रूयते। अस्यैव ईषद्दर्शनं रूसदेशस्य साहित्यकारेण टॉल्स्टॉय-महोदयेनापि प्राप्तमासीत्। गान्धीमहाभागस्तु द्वयोरपि तयोः विचारैः परिचितः आसीत्। अत्र स्वदेशेऽपि गान्धीमहाभागात्पूर्वम् अरविन्दमहोदयेन सविनयस्य आज्ञाभङ्गस्य असहयोगस्य च विचारः देशवासिनां पुरतः उपन्यस्तः। तथापि अयं प्रश्नस्तु अस्त्येव यदयं प्रयोगः सर्वप्रथमतया भारते एव कथं संपन्नः?



RaadheytheVisiion || Contact us: - +919625757536; +918889907405
mailto:mentorship@raadheythevisiion.in raadheythevisiion.in
Mukherjee Nagar, North West, Delhi-110009

अत्रोत्तरं तु स्पष्टम्। शारीरिकबलापेक्षया आत्मबलं प्रशस्यतरम् इति अनेन सत्येन यथा भारतवासिनः परिचिताः आसन् न तथा अन्यदेशीयाः जनाः। थोरो-टॉल्स्टॉय-एमर्सन-रोम्यारोलाँ आदिषु यदापि एतादृशी भावना उद्बुद्धा तदा तत्र भारतीयस्य दर्शनस्य प्रेरणैव कार्यरता आसीत्। सविनयाज्ञाभङ्गस्य कल्पना अस्य देशस्य दर्शने विद्यमाना आसीत्। स एव जनः एतत्कल्पना-पर्यन्तं गन्तुं शशाक यस्मिन् भारतीयायाः चिन्तनधारायाः प्रभावः आसीत् अथवा येन अनायासमेव एतादृशी चिन्तन-पद्धतिः प्राप्ता या वस्तुतः भारतस्य पद्धतिः आसीत्। थोरोविषये टॉल्स्टॉयविषये च उभौ अपि विकल्पौ संभाव्येते। पारिशेष्येण अरविन्दमहाभाग एव शिष्यते, स तु भारतीयः आसीदेव।

*(a)* विश्वस्य अवधानं गान्धीमहाभागं प्रति कथम् आकृष्टम्?

*(b)* किमर्थं गान्धीमहोदयः अहिंसामेव स्वातन्त्र्यप्राप्तये मुख्यसाधनरूपेण स्वीकृतवान्?

*(c)* पशुमनुष्ययोः किमन्तरं लेखकेन निर्दिष्टम्?

*(d)* अहिंसायाः प्रयोगः भारते एव कथमारब्धः?

*(e)* सविनयाज्ञाभङ्गस्य कल्पनापर्यन्तं गन्तुं कस्य सामर्थ्यमासीत्?

**3.** अधस्तनगद्यभागस्य संक्षेपः मूलभागस्य तृतीयांशपरिमितो स्वशब्दैरेव लेख्यः। शीर्षको न प्रदेयः — 60

अद्यतनीयस्य आधुनिकमनुष्यस्य समीपे इतिहासस्य सामयिकानां नियमानां विधीनां च यावद् ज्ञानमस्ति तावत् कदाचित् पूर्वस्मिन् कस्मिन्नपि युगे नासीत्। यथार्थतः सः ऐतिहासिको 'मानवः' अस्ति। एकप्रकारेण तु इतिहासबोध एव आधुनिकतायाः पर्यायो जातः। मध्यकालस्य संस्कृतौ धर्मस्य यत् केन्द्रभूतं स्थानमासीत् तत्स्थानम् अधुना अनेन क्रमशः इतिहासाय समर्पितम्। अद्य मनुष्यः प्रकृते परिवेष्टने न जीवति अपितु इतिहासस्य संदर्भे निवसति। अस्मिन् संदर्भे प्रत्येका घटना पूर्वघटनापेक्षया नवीनतरा अस्ति। यत् साम्प्रतं घटते तत् पूर्वं कदापि न घटितम्। मनुष्यस्य क्रमिकविकासस्य अयं बोधः प्राचीनेभ्यः यूनानवासिभ्यः अपरिचितः परकीयश्च आसीत्। भारतीयेभ्यः मनीषिभ्यः अपि अयं एवमेव अज्ञातपूर्वः। कालस्य तेषाम् अवधारणा विकासरूपेण न आसीत् अपितु 'चक्र'रूपेण ते कालम् अपश्यन्। पूर्वं 'परम्परा' मनुष्यस्य अन्तःवासिनी आसीत् तया च अस्य जीवनशैली अनुशास्यते स्म। अधुना मनुष्यस्य भविष्यं इतिहासः निर्धारयति। परम्परायाः अन्वेषणाय तेन पृष्ठदर्शिना भवितव्यमधुना।

इदं सत्यं यदद्य इतिहासस्य यादृशं प्रभुत्वं अस्माकं जीवने अस्ति तादृशं पूर्वं कदापि नासीत्। परं तत्र इदमपि सत्यं यदद्य मनुष्यः कालेन इतिहासेन च व्याकुलीकृतः। एकोनविंशशताब्द्यां सार्वभौमस्तया संपन्नः यः इतिहासबोधः मानव-विकासस्य मानव-मुक्तेश्च संदेशमानीतवान् सः अस्माकं समये तु स्वस्य एव क्रूरे उपहासे परिवर्तमानः दृश्यते। भविष्यस्य निर्धारकाः विधयः नियमाः सूत्राणि च अद्यापि सन्ति किन्तु तेषु विंशशताब्द्याः नैष्ठुर्यस्य मोहभङ्गस्य च एतावान् गभीरो प्रभावः दृश्यते यत् भविष्यत्कालस्य संवृतेषु कक्षेषु तेषां संगतिः नास्ति ते च तत्र अनुपयोगिनः व्यर्थाश्च भूताः। कीदृशोऽस्ति अयं विज्ञानसम्मतः, तर्कसंगतः महिमामण्डितश्च अर्थबोधः यः अद्य मनुष्यं अनागतकालं प्रति एतावन्तं अरक्षितम् आतङ्कयुक्तं संशययुक्तं च कृत्वा त्यक्तवान्?



RaadheytheVisiion || Contact us: - +919625757536; +918889907405
mailto:mentorship@raadheythevisiion.in raadheythevisiion.in
Mukherjee Nagar, North West, Delhi-110009

वयं मानवस्य भाविनो विषये न जानीमः इति न। आधुनिको मनुष्यः इतिहासबोधेन उत्प्रेरितो भूत्वा भाविनो विषये यासां परिकल्पनानां संभावनानां च अन्वेषणं कृतवान् ताः आधारीकृत्य भाविनो कालस्य एका परिपूर्णा रसायनशाला निर्मातुं शक्यते।

परमयं भविष्यकालः वर्तमानविभीषिकया सर्वथा असंबद्ध एव। एवमपि कथयितुं शक्यते यत् वर्तमानकालस्य विभीषिकायाः त्राणायैव अयम् 'ऐतिहासिक-भविष्यकालो' निर्मितः स तु वर्गविहीनस्य समाजस्य स्वप्नो वा भवतु, कम्प्यूटरसंचालितस्य यन्त्रमानवस्य ('रोबो' इत्यस्य) यन्त्रलोको वा भवतु। अनेन न किमपि अन्तरं जायते। वयं तु न वास्तविके काले जीवामः अपितु कल्पनायाः लोके वसामः। एतत्तु सर्वथा विचित्रं यत् अस्मात् भविष्यकालात् मनुष्यस्य मृत्युः निर्वासिता अस्ति यतो हि स्वमृत्योः भीत्वा अस्माभिः भविष्यलोके शरणं गृहीतम्।

इयमस्ति आधुनिकस्य युगस्य विचित्रा विडम्बना यदेकतः अद्यतनीयो मानवः 'इतिहासबोधेन' आक्रान्तो वर्तते अपरतश्च मृतस्य अतीतस्य काल्पनिकस्य अनागतस्य च मध्ये इतिहासस्य जीविता धारा अपि शुष्कतां प्राप्ता। यथा नद्यां निमज्जमानो पुरुषः तस्याः एव नद्याः जलेन सह आत्मनः सम्बन्धं योजयितुम् असमर्थः तथैव इतिहासे निमग्नो मनुष्यः कालस्य मर्म न विजानाति। सः इतिहासेन प्रभावितः भवतु किन्तु तमितिहासं स्वीयस्य जीवनस्य मृत्योः वा साक्षिनं कर्तुं न समर्थः। तस्य इतिहासस्य का प्रासंगिकता स्यात् यः अस्यां पृथिव्यां मनुष्यस्य साक्षी भवितुं न शक्नोति? अस्मादेव कारणात् इतिहासबोधः आधुनिकस्य मनुष्यस्य अन्धविश्वासः एव जातः यं प्रति सः भविष्यकालस्य अर्थवत्तां ज्ञातुं न गच्छति अपितु वर्तमानकालात् मुक्तिं वाञ्छन् आश्रयति।

परं किं वर्तमानकालात् मुक्तिः अस्माकं कृते शक्या अस्ति? किं वर्तमानमेव एतादृशो केन्द्रबिन्दुर्नास्ति यत्र मनुष्यः संपूर्णां स्वीयां स्थितिम् अवगन्तुं शक्नोति। अत्र एकतस्तु सः नश्वरः अस्ति अपरतश्च सः इतिहासे जीवित एवास्ति। इयं नियतिः तस्य व्यक्तिगतेन अतीतेन संबद्धा परं तेन सहैव इयं मनुष्यस्य समग्रं भविष्यम् आलोकयति यस्मिन् अन्येषामपि नियतिः संसृष्टा भवति।

(439 शब्दाः)

**4.** अधःस्थगद्यभागस्य आङ्गलभाषया अनुवादः कर्तव्यः — 20

वर्तमानं युगं सूचनायाः प्रौद्योगिक्याश्च युगम् अस्ति। सूचना प्रौद्योगिकी च विज्ञानक्षेत्रे संपद्यमानेषु तेषु आविष्कारेषु अन्यतमा अस्ति यैः विस्मयकारिणीभिः स्वोपलब्धिभिः मानवजातिः समृद्धिं प्राप्ता। विश्वस्य कस्मिन्नपि क्षेत्रे आसीना अपि वयं वैज्ञानिकानाम् उपकरणानाम् उपयोगेन कामपि सूचनां कस्मादपि स्थानात् प्राप्तुं समर्थाः। सूचनाप्राप्तौ अनेन सौविध्येन देशानां मध्ये व्यवधानानि लुप्तानि। अधुना तु एवं प्रतीयते यत् संपूर्णं जगत् संकुचितं भूत्वा अस्माकं मुष्ट्याम् आगतम्। अन्यथा अपि 'वैश्वीकरण'स्य, 'वसुधैव कुटुम्बकमि'त्यस्य च अवधारणा वैज्ञानिकस्य विकासस्य अस्मिन् युगे त्वरिततया फलीभूततां प्राप्नोति इति प्रतीयते।

अद्य वयं तान् दिवसान् स्मरामः यदा पत्रसंप्रेषणस्य उचिता व्यवस्था नासीत्। संदेशानां वार्तानां च आदानं प्रदानं च संदेशहराणां माध्यमेन अभवत्। अस्मिन् कार्ये दीर्घो समयः अपेक्षितः आसीत्। तस्मिन् काले जीवनं कियत् कठिनमासीत् इत्यस्य अनुमानमपि कर्तुम् अद्य न सुकरम्। परिवर्तमानेन कालेन सह सूचनाक्षेत्रे नवीनाः प्रयोगाः आरब्धाः। पत्रप्रेषण-विद्युत्संदेश-दूरभाष-इत्यादीनां व्यवस्था कृता। आरम्भे पत्राणां माध्यमेन संदेशानां गमनागमनम् अभवत्। एवं जीवने



RaadheytheVisiion || Contact us: - +919625757536; +918889907405
mailto:mentorship@raadheythevisiion.in raadheythevisiion.in
Mukherjee Nagar, North West, Delhi-110009

गतिः आयाता एवं च आकाशवाणी (रेडियो इति), दूरदर्शनं च अस्यां दिशायां पादक्षेपम् अकुरुताम्। कम्प्यूटराणाम् आगमनेन सहैव सूचनाजगति क्रान्तिः आरब्धा। अन्तर्जालस्य (इंटरनेट इति) विकासानन्तरं सर्वेषां कम्प्यूटरयन्त्राणां परस्परं सम्बन्धो योजितः त्वरितसंप्रेषणे च अधिकतरं सौकर्यं जातम्। सूचनाजगति नित्यं अभिनवानि परिवर्तनानि जायन्ते नवीनतमं ज्ञानं च तत्क्षणेन प्राप्यते। अद्य कोऽपि मनुष्यः कस्यचिदपि स्वीयस्य उत्पादस्य विज्ञापनं विश्वस्मिन् जगति सौकर्येण कर्तुं शक्नोति। परम्परागतैः आयुधैः संग्रामम् अकृत्वापि सः योद्धुं शक्नोति। प्रायः सर्वेष्वपि गृहेषु कार्यालयेषु च कम्प्यूटरस्य अन्तर्जालस्य च सौविध्यम् उपलभ्यते येषां साहाय्येन वायुयानस्य, रेलयानस्य, बसयानस्य च यात्रापत्राणि चलचित्रादीनां च अनुमतिपत्राणि (Ticket इति) इत्यादीनि सौकर्येण क्रेतुं शक्यन्ते। आरक्षणस्य का स्थितिः इत्यपि अविलम्बेन ज्ञातुं शक्यते। पथिषु यातायातस्य स्थितेः ज्ञानं प्राप्तुं शक्यते। चलदूरभाषे अन्तर्जालस्य माध्यमेन सर्वं वस्तु गृहे उपविश्यैव क्रेतुं शक्यते। यत्सत्यं संवादस्य सूचनायाश्च संप्रेषणाय इदं सर्वाधिकम् अल्पमूल्यं साधनम् अस्ति।

**5.** अधःप्रदत्तस्य गद्यानुच्छेदस्य संस्कृतभाषानुवादः कर्तव्यः — **20**

Democracy stands much superior to any other form of government in promoting dignity and freedom of the individual. Every individual wants to receive respect from fellow beings. Often conflicts arise among individuals because some feel that they are not treated with due respect. The passion for respect and freedom are the basis of democracy. Democracies throughout the world have recognized this, at least in principle. This has been achieved in various degrees in various democracies. For societies which have been built for long on the basis of subordination and domination, it is not a simple matter to recognize that all individuals are equal.

Take the case of dignity of women. Most societies across the world were historically male dominated societies. Long struggles by women have created some sensitivity today that respect to and equal treatment of women are necessary ingredients of a democratic society. That does not mean that women are actually always treated with respect. But once the principle is recognized, it becomes easier for women to wage a struggle against what is now unacceptable legally and morally.

**6.** *(a)* अधोलिखितानां स्वरचित-वाक्येषु प्रयोगः कार्यः — **2×5=10**

*(i)* इतस्ततः

*(ii)* निकषा

*(iii)* परितः

*(iv)* शनैः शनैः

*(v)* अद्य



RaadheytheVisiion || Contact us: - +919625757536; +918889907405
mailto:mentorship@raadheythevisiion.in raadheythevisiion.in
Mukherjee Nagar, North West, Delhi-110009

(b) पदसाधनं क्रियताम्— 1×10=10

(i) युष्मद् + सप्तमी, एकवचनम्

(ii) कवि + तृतीया, बहुवचनम्

(iii) मातृ + तृतीया, एकवचनम्

(iv) मनस् + द्वितीया, द्विवचनम्

(v) गो + षष्ठी, बहुवचनम्

(vi) पठ् + लोट्, प्रथमपुरुषे एकवचनम्

(vii) स्था + लृट्, प्रथमपुरुषे बहुवचनम्

(viii) लभ् + लट्, उत्तमपुरुषे एकवचनम्

(ix) कृ + लोट्, परस्मैपद, उत्तमपुरुषे एकवचनम्

(x) हन् + लट्, प्रथमपुरुषे बहुवचनम्

(c) समासो विधेयः, समासनाम च लेखनीयम्— 2×5=10

(i) गङ्गायाः समीपम्

(ii) ग्रामं गतः

(iii) पञ्चानां वटानां समाहारः

(iv) चन्द्र इव मुखं यस्याः सा

(v) पार्वती च परमेश्वरः च

(d) अधोलिखितानि वाक्यानि शुद्धीकरणीयानि— 2×5=10

(i) मया ग्रन्थः पठति।

(ii) दुर्जनः सज्जनं क्रुध्यति।

(iii) बालकं मिष्टान्नं रोचते।

(iv) पवनं मन्दं मन्दं वहति।

(v) सूर्यस्य अस्तं गते सति सर्वे गृहं गताः।

* * *



RaadheytheVisiion || Contact us: - +919625757536; +918889907405
mailto:mentorship@raadheythevisiion.in raadheythevisiion.in
Mukherjee Nagar, North West, Delhi-110009